# naTeshanavaratnamAlikA

# શ્રીનટેશનવરત્નમાલિકા

## Document Information

Text title : naTeshanavaratnamAlikA

File name : naTeshanavaratnamAlikA.itx

Category : shiva, stotra, nava

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : December 10, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીનટેશનવરત્નમાલિકા

॥ શ્રીઃ ॥

પ્રપન્નજનસન્દોહ-પ્રત્યહ-ધ્વાન્ત-ભાસ્કરમ્ ।
અમૃતાંશુકલાચૂડં કુઞ્જરાસ્યમુપાસ્મહે ॥ ૧॥

આજાનુબાહુમરવિન્દદલાયતાક્ષ-
માનીલદેહમસુરદ્વિષમબ્જવક્ત્રમ્ ।
અમ્બોધિજાધિપવાઙ્મનસાવગમ્યં
ગોવિન્દ્રાજમનુચિન્તય ચિત્ત નિત્યમ્ ॥ ૨॥

યસ્યાહુર્મહિમાનમાગમવિદો વાઙ્માનસાધ્વાતિગં
પ્રાપુર્યન્નટનાવલોકનવશાન્મુક્તિં ફણિશાદયઃ ।
યડ્ઢક્કાનિનદારુણો હૃદયગં પ્રોન્માર્ષ્ટિ નૃણાં તપઃ
સ શ્રીકન્ત-વિધીન્દ્ર-વન્દ્ય-ચરણો દદ્યાન્નટેશશ્શિવમ્ ॥ ૩॥

નૃત્યં ત્વદીયમવલોક્ય નટેશ પૂર્વ-
માનન્દતુન્દિલહૃદો મુનયો બભૂવુઃ ।
તદ્દર્શયાદ્ય મમ મોદમુપૈમિ ચાહં
નિષ્પક્ષપાત ભવતસ્સમ એવ સર્વઃ ॥ ૪॥

નન્દાદયોઽપિ નટરાજ પુરાલભન્ત
ભક્ત્યા પદાંબુજયુગે તવ બન્ધમોકમ્ ।
દેયાદ્ય સા ન કિમુ મે કરુણાંબુરાશે
કો વા મયા વ્યરચિ તં વદ તેઽપરાધઃ ॥ ૫॥

કસ્માન્નટેશ કુરુષે ન કૃપાં મયિ ત્વં
કિં વા ત્વયા ન વિદિતો મમ દીનભાવઃ ।
જાનાતિ નો યદિ ભવાન્મમ દીનતાં તત્
શ્રુત્યુક્તમીશ વિતથં કિમુ સર્વવિત્ત્વમ્ ॥ ૬॥

સંસૃત્યુદન્વતિ નટેશ સદાઽપ્યગાધે
    મગ્નં ન માં ચિરમુદાસિતુમર્હસિ ત્વમ્ ।
યદ્યપ્યહં તવ ચકાર બહૂન્ હિ મન્તૂન્
    શંભો તવાઽપિ ન હિ તાન્ ગણયાન્તરઙ્ગે ॥ ૭॥

દુઃખાંબુદૌ પતિતમીશ સમુદ્ધરૈનં
    નોચેચ્છરણ્ય ન હિ મે ક્ષતિરસ્તિ કાપિ ।
ભૂયાન્નિમજ્જનમકીર્તિપયોનિધૌ તે
    સર્વેશ્વરસ્ય ભવતો ન હિ યુક્તમેતત્ ॥ ૮। ।
પાદાંબુજાતયુગલં તવ યો ભજેત
    હન્તાધિરોહતિ હિ તસ્ય લલાટમગ્નિઃ ।
વક્ષસ્થલં વિષધરો વિષમુત્તમાઙ્ગં
    કણ્ઠઞ્ચ પાર્શ્વભુજમસ્ય પિશાચવર્ગાઃ ॥ ૯॥

ત્વામામનન્તિ નટનાથ પદાબ્જભાજાં
    સર્વાર્થદાયિનમહો નિખિલાશ્ચ વેદાઃ ।
ત્વં ચોરયસ્યહહ શોકમશેષમેષાં
    અન્યાદૃશી વિલસતીશ વદાન્યતા તે ॥ ૧૦॥

સર્વેશ્વરોઽપિ નટરાજ દિગંબરસ્ત્વં
    વાહો વૃષસ્તવ ગિરૌ શયનં પિશાચાઃ ।
મિત્રાણિ ભૂષણમહો ભુજગશ્ચ ભસ્મ
    ભિક્ષામટસ્યપિ ચ નૃત્યસિ નિત્યમેવ ॥ ૧૧॥

તાતો ભવાન્મમ તનૂભવ એષ તેઽહં
    સર્વેશ્વરોઽસ્યહમપીશ નિતાન્તદીનઃ ।
એતાદૃશં ન કિલ માં પરિરક્ષસિ ત્વં
    પ્રેમાત્મજેષ્વસદૃશં ભવતો વિભાસિ ॥ ૧૨॥

શ્રીમન્નટેશ-ચરણાબ્જ-સમર્પ્યમાણં
    શ્રીરામશર્મ-કલિતાં નવરત્નમાલાં ।
સન્તો વિલોક્ય પરિહૃત્ય સમસ્ત-દોષાન્
    ગૃહ્ણન્તુ પૂર્ણકૃપયા ગુણમલ્પમેવ ॥ ૧૩॥

॥ શ્રીનટેશ નવરત્નમાલિકા સમાપ્તા ॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in

*naTeshanavaratnamAlikA*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*